National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2017; 1(14): 109-113
© 2017 NJHSR
www.sanskritarticle.com

**डा. के. राजगोपालन्**
आचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः – 517507
:

**Correspondence:**
**डा. के. राजगोपालन्**
आचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः – 517507

# "जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः"

**डा. के. राजगोपालन्**

**"लोकोत्तरवर्णनानिपुणकविकर्म (काव्यम्)"** इति मम्मटाचार्यस्य काव्यप्रकाशीयवृत्तिवाक्यतः कवेः कर्म कविकर्म तत् काव्यं भवतीत्यर्थः। तत्र कः कविः? तस्य भेदाश्च के? प्रभेदाश्च के? इति विचिकित्सायां राजशेखरस्य काव्यमीमांसायाः पञ्चमाध्यायस्यानुसन्धानात् शोधपत्रमिदं प्रस्तूयते॥

**कविः –**

प्रतिभाव्युत्पत्तिमांश्च कविः कविरित्युच्यते। स च त्रिविधः – शास्त्रकविः काव्यकविरुभयकविश्च। छन्दः पूरणमात्रेण न कविर्भवति। अपि तु प्रतिभाव्युत्पत्तिभ्यां युक्तः कविरेव कविशब्देन व्यवह्रियते। स कविः त्रिधा – 1. शास्त्रकविः, 2. काव्यकविः, 3. उभयकविः (शास्त्र–काव्योभयकविः) चेति।

एतेषु उत्तरोत्तरो गरीयान् इति श्यामदेवः। राजशेखरः ईदृशं तारतम्यं न युक्तमिति सदृष्टान्तं कथयति - स्वाभ्यस्तविषये सर्व एव परापेक्षया गरीयान् भवति इत्यतः श्यामदेवोक्तं तारतम्यमतं नाङ्गीकरोति। यथा नीर-क्षीरविवेककुशलोऽपि राजहंसः चन्द्रिकां पातुं न प्रभवति, एवं चन्द्रिकाचमनचतुरोऽपि चकोरः नीरात् क्षीरमुद्धर्तुं न शक्नोति। अतः हंस-चकोरयोः दृष्टान्ते न कश्चित् उत्कृष्टः, न कश्चत् अपकृष्टः, स्वस्वविषये श्रेष्ठ एव[1]॥

### 1. शास्त्रकविः –

**"शास्त्रकविः काव्ये रससम्पदं विच्छिनत्ति"**[2] इति शास्त्रकविलक्षणम्। शास्त्रेषु सविशेषं कृतश्रमोऽपि काव्येषु रसाभिव्यञ्जनसमर्थशब्दार्थसन्निवेशं कर्तुं न पारयति। शास्त्रकवेः शास्त्रसंस्कारः साधारणः सन् काव्यरचनाप्रवेशे एव वैचित्र्यमुत्पादयति, न तु सर्वदा। तस्य बुद्धिः सर्वदा शास्त्रे निमग्ना सती सुकवितासम्पादनौपयिकशब्दार्थस्फूर्तिं प्रतिबध्नाति। एवं शास्त्रकविः त्रिधा –

1. यः शास्त्रं विधत्ते – यः शास्त्रं रचयति। यथा – आनन्दवर्धनः इत्यादयः।
2. यश्च शास्त्रे काव्यं संविधत्ते – यः शास्त्रे काव्यं निबध्नाति। यथा – जगन्नाथपण्डितरायः इत्यादयः।
3. योऽपि काव्ये शास्त्रार्थं निधत्ते – काव्ये शास्त्रार्थं ग्रथयति। यथा – भट्टिकविः इत्यादयः चेति।

### 2. काव्यकविः -

**"काव्यकविः शास्त्रे तर्ककर्कशमप्यर्थमुक्तिवैचित्र्येण श्लथयति"**[3] इति काव्यकविलक्षणम्। एवमेव काव्यकविः काव्येषु लब्धसविशेषव्युत्पत्तिरपि शास्त्रीयान् पदार्थान् तत्तच्छास्त्रीयपारिभाषिकशब्दैः वर्णयितुं न शक्नोति। अतः उभावपि शास्त्र-काव्यकवी अन्योऽन्यसापेक्षौ समानावेव॥

काव्यकविः पुनरष्टधा – 1. रचनाकविः, 2. शब्दकविः, 3. अर्थकविः, 4. अलङ्कारकविः, 5. उक्तिकविः, 6.रसकविः, 7. मार्गकविः, 8. शास्त्रार्थकविः – चेति। एतेषां लक्षणोदाहरणानि पश्यामः -

### 2.1. रचनाकविः –

रचनाकविर्नाम श्रुतिसुखा प्रागाढप्रौढप्रबन्धा रचना कर्तुं यः प्रभवति सः। तद्यथा -

**लोलल्लाङ्गूलवल्लीवलयितवकुलानोकहस्कन्धगोलै-**
**र्गोलाङ्गूलैर्नदद्भिः प्रतिरसितजरत्कन्दरामन्दिरेषु।**

**खण्डेषूद्दण्डपिण्डीतगरतरलकाः प्रापिरे येन वेला-**

**मालङ्घ्योत्तालतल्लस्फुटितपुटकिनीबन्धवो गन्धवाहाः॥**[4]इति।

अत्र श्लोके केवलं शब्दानुप्रासाय अनेकनिरर्थकशब्दाः अनावश्यकशब्दाश्च प्रयुक्ताः। इत्थमत्रायं कविः श्लोकरचनामात्र एव दृष्टिनिधानात् रचनाकविः भवति॥

**2.2. शब्दकविः –**

शब्दकविः पुनः त्रिधा - 1. नामकविः, 2. आख्यातकविः, 3. उभयकविः अथवा नामाख्यातकविः चेति प्रभेदाः सन्ति।

**2.2.1. नामकविः –**

नामात्मकशब्दप्रधानरचनाशीलो नामकविः। यथा -

**विद्येव पुंसो महिमेव राज्ञः प्रज्ञेव वैद्यस्य दयेव साधोः।**

**लज्जेव शूरस्य मृजेव यूनो विभूषणं तस्य नृपस्य सैव॥**[5]इति नामकविकाव्यम्।

पुरुषस्य यथा विद्या भूषणम्, राज्ञः महिमा (प्रभुत्वम्) यथा, वैद्यस्य उत पण्डितस्य प्रज्ञा यथा, सत्पुरुषस्य (साधोः दया यथा, शूरस्य लज्जा यथा, यूनः मृजा (स्निग्धशरीरकान्तिः) यथा भूषणं तथा तस्य नृपस्य सा एव विभूषणम्॥

अत्र श्लोके विद्या, महिमा, राजा, प्रज्ञा, वैद्यः, दया, साधुः, लज्जा, शूरः, मृजा, यूनः, नृपः इति सर्वाणि पदानि नामवाचकानि एव प्रयुक्तानि, आख्यातपदम् (तिङन्तपदम्) एकमपि नोपयुक्तम्। अतोऽयं कविः नामकविः भवति॥

**2.2.2. आख्यातकविः –**

यः कविः आख्यातशब्दान् एव बहुशः प्रयुङ्क्ते स आख्यातकविः। यथा -

**उच्चैस्तरां जहसुराजहृषुर्जगर्जुराजघ्निरे भुजतटीनिकरैः स्फुरद्भिः।**

**सन्तुष्टुवुर्मुमुदिरे बहुमेनिरे च वाचं गुरोरमृतसम्भवलाभगर्भाम्॥**[6] इति।

क्षीरसमुद्रात् अमृते मथ्यमाने सति यदमृतमुद्भूतं तत् सर्वैरेव देवैः लप्स्यते इति ज्ञापकं बृहस्पतेः वचनं श्रुत्वा ते सर्वे देवाः आनन्दपारवश्येन उच्चैस्तरां **जहसुः** (अहसन्), आजहृषुः (अहर्षन्), जगर्जुः (अगर्जन्), स्फुरद्भिः करैः भुजतटानि आजघ्निरे (आहन्यन्त), सन्तुष्टुवुः (समस्तुवन्), मुमुदिरे (अमोदन्त), (गुरोः वाचः) बहुमेनिरे (बह्वमन्यन्त) च॥

आख्यातो नाम तिङन्तपदम्। अत्र श्लोके अनेकतिङन्तपदानि उपयुज्य एकां शोभाम् अजनयत्। अतोऽयं कविः आख्यातकविः भवति। अयं श्लोकश्च आख्याकविकाव्यस्य उदाहरणं भवति॥

**2.2.3. नामाख्यातकविः –**

यः कविः नामशब्दान् आख्यातशब्दान् च समानतया प्रयुङ्क्ते स नामाख्यातकविः भवति। यथा –

**हतत्विषोऽन्धाः शिथलांसबाहवः श्रि(स्त्रि)यो विषादेन विचेतना इव।**

**न चुक्रुशुर्नो रुरुदुर्न सस्वनुर्न चेलुरासुर्लिखिता इव क्षणम्॥**[7]इति।

प्रत्यग्रजातपतिनिधनशोकानां विधवानां दुरवस्थायाः वर्णनमस्मिन् श्लोके प्राप्यते। पत्युः मरणेन सौभाग्यस्य अपगमात् हतत्विषः किङ्कर्तव्यविमूढाः शिथिलांसबाहवः विषादेन विचेतना इव स्त्रियः न चुक्रुशुः, नो रुरुदुः, न सस्वनुः, किन्तु लिखिता इव न चेलुः इति॥

अत्र पूर्वार्धे नामप्रधाना, उत्तरार्धे च आख्यातप्रधाना रचना इति अतोऽयं कविः नामाख्यातकविः भवति। अयं श्लोकश्च नामाख्यातकविकाव्यस्य उदाहरणं भवति॥

**2.3. अर्थकविः –**

यः च अलङ्कार-रस-भावादिनिरपेक्षम् अर्थमात्रमेव वर्णयति सः अर्थकविः भवति। यथा -

**देवी पुत्रमसूत नृत्यत गणाः किं तिष्ठतेत्युद्भुजे**

**हर्षाद्भृङ्गिरिटावुदाहृतगिरा चामुण्डयालिङ्गिते।**

**पायाद्वो जितदेवदुन्दुभिघनध्वानप्रवृत्तिस्तयो-**

**रन्योन्याङ्कनिपातजर्जरजरत्स्थूलास्थिजन्मा रवः॥**[8]इति।

पार्वत्याः पुत्रोत्सवप्रसङ्गे शिवगणानां हर्षस्य वर्णनमत्र श्लोके प्राप्यते। "देवी पार्वती पुत्रमसूत, हे प्रमथादिगणाः! किं तिष्ठत? नृत्यत।" इति हर्षात् उन्नमितभुजाग्रे कृतहर्षसूचकशब्दया चामुण्डया (एतन्नामकस्त्रीगणविशेषेण) आलिङ्गिते भृङ्गिरिटौ (तन्नामकगणे सति), देवदुन्दुभेः घनध्वानः प्रसृतः यया जिता तयोः परस्परम् अङ्के निपातेन भग्नप्रायजीर्णेभ्यः कण्ठमालात्वेन धृतस्थूलास्थिभ्यः प्रादुर्भूतः तुमुलः युष्मान् पायात्॥

अत्र कविः नामवाचकप्रयोगाय वा आख्यातवाचकप्रयोगाय वा प्रधान्यम् अप्रदाय, प्रमथगणानां हर्षः कीदृशः जातः? इति चमत्कारजनकार्थः एव सुष्ठु वर्णितः। अपि च रसभावालङ्कारादिसन्निवेशे न किञ्चिदपि प्रयतितम् इत्यतः अयं श्लोकः अर्थकवेः काव्यस्योदाहरणं भवति॥

**2.4. अलङ्कारकविः –**

अलङ्कारकविः द्विविधः– 1. शब्दालङ्कारकविः, 2. अर्थालङ्कारकविः चेति।

**2.4.1.शब्दालङ्कारकविः –**

**न प्राप्तं विषमरणं प्राप्तं पापेन कर्मणा विषमरणं च।**

**न मृतो भागीरथ्यां मृतोऽहमुपगूह्य मन्दभागी रथ्याम्॥**[9]इति।

मया यत् कठिनं युद्धं वर्तते तस्मात् न मरणं प्राप्तम्, अपि तु मया पापेन कर्मणा विषद्वारा मरणं प्राप्तम्। एवमहं गङ्गातीरे न मृतः, अपि तु अल्पभाग्यः रथ्यामेव मृतः इति॥

अत्रायं श्लोकः "विषमरणं", "भागीरथ्याम्" इत्यंशयोः पदान्तयमकः, शब्दशक्तिमूलको विरोधाभासश्चेति शब्दालङ्कार-प्राधान्यात् शब्दालङ्कारकवेः शब्दालङ्कारस्य उदाहरणम्॥

**2.4.2.अर्थालङ्कारकविः –**

**भ्रान्तजिह्वापताकस्य फणच्छत्रस्य वासुकेः।**

**दंष्ट्राशलाकादारिद्र्यं कर्तुं योग्योऽस्ति मे भुजः॥**[10]इति।

कस्यचन वीरस्य दर्पोक्तिः अत्र श्लोके वर्णिता। मुहुर्मुहुः जिह्वाचालनपुरस्सरं वायुभक्षणं सर्वस्वभावः। वासुकेः (नागराजस्य) चलज्जिह्वा एव पताकाः, फण एव छत्रं, दंष्ट्रा एव शलाकाः सन्ति। एतान् उत्पाटयितुं मम भुजः समर्थो विद्यते॥

अत्र जिह्वापताक-फणच्छत्र-दंष्ट्राशलाकाशब्देषु रूपकालङ्कारो वर्तते। तैश्च वासुकिः चक्रवर्तीति अर्थप्रतीतिर्भवति। इत्थं रूपकेण अर्थालङ्कारेण काव्यस्य ग्रथनात् अर्थालङ्कारकवेरुदाहरणम्। (जिह्वायां पताकायाः, फणे छत्रस्य, दंष्ट्रायां शलाकायाः तन्मूलकवासकौ राजत्वस्य च आरोपात् रूपकालङ्कारः चमत्कारतया वर्णितः। रूपकालङ्कारस्य अर्थालङ्कारत्वादियं रचना अर्थालङ्कारकवेः उदाहरणम्॥)

**2.5. उक्तिकविः –**

उक्तिवैचित्र्यं नाम सामान्यतो यद्वक्तव्यं तद्यदि सहृदय-हृदयाह्लादकेन भङ्ग्यन्तरेण पर्यायोक्तपद्धत्या अभिधानम्। तादृशरचनाकविः उक्तिकविः इत्युच्यते।

उक्तिकविकाव्यस्य उदाहरणम् –

**प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः**

**कपोलः पाण्डुत्वादवतरति ताडीपरिणतिम्।**

**परिम्लानप्रायामनुवदति दृष्टिः कमलिनी-**

**मितीयं माधुर्यं स्पृशति च तनुत्वं च भजते॥**[11]इति।

अत्र कस्याश्चित् सुन्दर्याः रूपसौन्दर्यं निरीक्ष्य माद्यतः रसिकस्य सखायं प्रतीयमुक्तिः। अधरः अशोकवृक्षसम्बन्धिनीं किसलयपरावृत्तिं वाञ्छति। एवं कपोलः प्रियविरहजन्यात् पाण्डुत्वात् परिणत-तालशोभां धारयति। दृष्टिः कमलिनीं प्रायशः म्लानामेव व्यञ्जयति। इति हेतोरियं सुन्दरी माधुर्यं धारयति, तनुत्वं च भजते॥

अत्र अधरः किसलयतुल्यः, कपोलः परिणततालपत्रसदृशः, दृष्टिः कमलिन्यधिकशोभायुक्ता इत्याद्यनुक्त्वा भङ्ग्यन्तरेण कथनं सहृदयहृदयाह्लादकमिति उक्तिकविकाव्यस्य स्पष्टमुदाहरणम्॥

**2.6. रसकविः –**

स्वकाव्ये रसमेव मुख्यतया यो निबध्नाति स रसकविः भवति। तद्यथा -

**एतां विलोकय तनूदरि! ताम्रपर्णी-**

**मम्भोनिधौ विवृतशुक्तिपुटोद्धृतानि।**

**यस्याः पयांसि परिणाहिषु हारमूर्त्या-**

**वामभ्रुवां परिणमन्ति पयोधरेषु॥**[12]इति।

ताम्रपर्णीनद्यां विहारकाले नायकस्य सन्निहितां नायिकां प्रतीयमुक्तिः। हे तनूदरि! एतां ताम्रपर्णीं विलोकय। समुद्रे विकसिताननेभ्यो शुक्तिपुटेभ्यः यानि सङ्गृहीतानि तानि ताम्रपर्णीसरितः पयांसि एव, अपि च तानि शुक्तिषु स्थितानि मौक्तिकात्मना परिणमन्ति। तानि मौक्तिकानि च सुन्दरीणां पयोधरेषु हारस्वरूपेण परिणमन्ति॥

अत्र पयांस्येव पयोधरेषु हारमूर्त्या परिणमन्तीत्युक्तेः कापि विच्छित्तिः प्रतीयते इति स्तनकुचादिशब्दाननुक्त्वा पयोधरेषु इति कथितम्। अत्र हे तनूदरि! इति नायककृतनायिकासम्बोधनेन नायकस्य नायिकायामनुरागः प्रतीयते। तनूदरी नायिका आलम्बनविभावः। तस्याः उत्तुङ्गपयोधरदर्शनम् उद्दीपनविभावः। नायकेन ताम्रपर्णीनदीजलवर्णनम् अनुभावः। “एतां ताम्रपर्णीं विलोकय” इत्युक्तौ नायकगतमौत्सुक्यं व्यभिचारीभावः। एवं विभावानुभावव्यभिचारिसंयोगात् नायकात्मसमवेता नायिका-विषयिणी रतिः सम्भोगशृङ्गारत्मना आस्वादयोग्यतां नीयते इति रसप्राधान्यात् रसकविकाव्यस्योदाहरणम्॥

**2.7. मार्गकविः –**

मार्गो नाम रीतिः। रीतिप्रधानं काव्यं यो निबध्नाति स मार्गकविः। तेन रचितं काव्यं मार्गकविकाव्यं भवति। तद्यथा –

**मूलं बालकवीरुधां सुरभयो जातीतरूणां त्वचः**

**सारश्चन्दनशाखिनां किसलयान्याद्राण्यशोकस्य च।**

**शैरीषी कुसुमोद्गतिः परिणमन्मोचं च सोऽयं गणो**

**ग्रीष्मेणोष्महरः पुरा किल ददे दग्धाय पञ्चेषवे॥**[13]इति।

कोमललतानां मूलानि, सुगन्धयुताः जातीतरूणां त्वचः, चन्दन-वृक्षाणां सारः, अशोकस्य आर्द्राणि किसलयानि, शिरीषपुष्पाणाम् उद्गमः, पाकोन्मोचं कदलीफलम् – इत्येतेषां शीतलपदार्थानां गणः पूर्वम् शिवनेत्राग्निना दग्धाय पञ्चबाणाय मन्मथाय सन्तापहर इति हेतोः ग्रीष्मेण दत्तः। ऊष्महरा एते पदार्थाः ग्रीष्मे एव भवन्तीति भावः॥

अत्र श्लोके सकुमारं वैदर्भीरीतिमनुसृत्य कोमलाक्षराणां दीर्घसमासरहितानां पदानां च प्रयोगेण तत्तद्वृक्षमूलान्यारभ्य फलानि यावत् ग्रीष्मोपशान्तिकरसामग्र्याः क्रममवलम्ब्य वर्णनात् अयं मार्गकविः भवति। इत्येवमिदं पद्यं च वैदर्भीरीत्यां वर्णितमिति मार्गकविकाव्यस्योदाहरणं भवति॥

**2.8. शास्त्रार्थकविः –**

यः शास्त्रीयमर्थं काव्ये निबध्नाति स शास्त्रार्थकविः भवति। तेन रचितं काव्यं शास्त्रार्थकविकाव्यं भवति। तद्यथा –

**आत्मारामा विहितरतयो निर्विकल्पे समाधौ**

**ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः।**

**यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्**

**तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम्॥**[14]इति।

वेणीसंहारनाटके कृष्णं बन्धनाय उद्यतं दुर्योधनं दृष्ट्वा भीमसेनस्य

सहदेवं प्रत्युक्तिः। निर्विकल्पकसमाधौ सदा विहितरतयः, विशुद्धज्ञानोदयाधिक्यात् अपगततमोग्रन्थयः, सत्त्विकाः मुनयः च आत्मारामाः एव तमसां ज्योतिषां च परस्तात् वर्तमानम् विद्याविद्ययोरतीतम् अनिर्वचनीयस्वरूपं परमात्मानं द्रक्ष्यन्ति, तादृशम् अमुं पुराणपुरुषं मोहान्धः अयं दुर्योधनः कथं द्रष्टुं शक्नुयात्? सर्वधा न शक्नुयादेवेति भावः॥

अत्र आत्मारामाः, निर्विकल्पकसमाधिः, ज्ञानोद्रेकः, तमोग्रन्थिः, तमसां ज्योतिषां परस्तात्, मोहान्धः इत्यादिशब्दाः तदर्थाः च योगशास्त्रे वेदान्तशास्त्रे च प्रसिद्धा वर्णिता इत्यतः अयं कविः शास्त्रार्थकविः भवति। तेषां शब्दानामर्थानां च काव्यात्मना निबन्धनात् इदं च पद्यं शास्त्रार्थकविकाव्यस्योदाहरणं भवति॥

**3. उभयकविः –**

**"उभयकविस्तूभयोरपि वरीयान् यद्युभयत्र परं प्रवीणः स्यात्"**[15] इत्युभयकविलक्षणम्। शास्त्रेषु काव्येषु च लब्धोत्कृष्टप्रबोधः कविः उभयकविः। शास्त्रकाव्ययोः समानप्रतिभावान् उभयकविरेव शास्त्रकविकाव्यकव्योरपेक्षया श्रेष्ठः।

अतः शास्त्रकवि-काव्यकव्योः मध्ये परस्परोपकार्योपकारकभावं वयमङ्गीकुर्मः। यतो हि यदि शास्त्रसंस्कारः ईषदपि स्यात् तर्हि काव्यशोभा वर्धते। केवलं शास्त्रसंस्कारः चेत् काव्यशोभा क्षीयते। तथैव काव्यसंस्कारः शास्त्रवाक्यपाकाय अनुगुणः चेत् उपकरोति। काव्यसंस्कारः अधिकप्राधान्ये सति शास्त्रवाक्यपाकाय अवरोधो भवति॥

एषां पूर्वोक्तकविप्रभेदानां मध्ये द्वाभ्यां त्रिभिर्वा गुणैः शब्दार्थालङ्काररचनात्मकैर्युक्तः कविः कनीयान् अधमश्रेणिगतः भवति। पञ्चभिः षड्भिर्वा गुणैर्युक्तः कविः मध्यमः। पूर्वोक्तैः सर्वैर्गुणैर्युक्तः चेत् स महाकविः इति व्यपदेशार्हो भवति॥

**कवेरवस्थाः तल्लक्षणानि च –**

कवेः दशसङ्ख्याकाः अवस्था भवन्ति। बुद्धिमान् आहार्यबुद्धिः एतयोः सारस्वत-अभ्यासिकयोः सप्तावस्थाः भवन्ति। औपदेशिकस्य दुर्बुद्धेः तिस्रो अवस्थाः सम्भवन्ति। एवं दशावस्थाः। तद्यथा – 1. काव्यविद्यास्नातकः, 2. हृदयकविः, 3. अन्यापदेशी, 4. सेविता, 5. घटमानः, 6. महाकविः, 7. कविराजः, 8. आवेशिकः, 9. अविच्छेदी, 10. सङ्क्रामयिता चेति॥

**1. काव्यविद्यास्नातकः -**

**"यः कवित्वकामः काव्यविद्योपविद्याग्रहणाय गुरुकुलान्युपास्ते स विद्यास्नातकः"**[16] इति। कवित्वं कामयमानः यः पुरुषः काव्योपयुक्ताः आन्वीक्षिक्यादिविद्याः कलाद्याः उपविद्याः च ग्रहीतुं काव्यविद्या-धूर्धराणां महाकवीनां गुरुकुलानि सेवते स काव्यविद्यास्नातकः भवति। वेदमधीत्य स्नायादिति वत् काव्यविद्यागुरुभ्यो महाकविभ्यः काव्यविद्यां साकल्येन अधिगम्य यः स्नाति सः काव्यविद्यास्नातकः इति॥

**2. हृदयकविः –**

**"यो हृदय एव कवते निह्नुते च स हृदयकविः"** इति। यश्च लज्जया दोषप्रकाशभिया वा स्वहृदये एव कवते स्वकाव्यम् अन्येभ्यो न दर्शयति स हृदयकविः॥

**3. अन्यापदेशी –**

**"यः स्वमपि काव्यं दोषभयादन्यस्येत्यपदिश्य पठति सोऽन्यापदेशी"** इति। यः स्वनिर्मितमपि काव्यं दोषभिया सभामध्ये "इदं काव्यम् अन्यस्य" इत्युक्त्वा पठति सोऽन्यापदेशीकविः॥

**4. सेविता -**

**"यः प्रवृत्तवचनः पौरस्त्यानामन्यतमच्छायामभ्यस्यति स सेविता"** इति। यः प्रवृत्तवचनः छन्दःपूरणाभ्यासवशात् प्रचलितकविताप्रवृत्तिः पुरुषः प्राचीनानां कवीनां मध्ये कस्यापि भावमादाय स्ववचनैर्नि-बध्नाति स सेविता॥

**5. घटमानः -**

**"योऽनवद्यं कवते न तु प्रबध्नाति स घटमानः"** इति। यः अनवद्यं निर्दोषं रसभावपूर्णमपि रचयति, किन्तु तथाविधं कमपि प्रबन्धं रचनया पूरयितुं न शक्नोति अर्थात् रचनां सुदूरं नानुवर्तयति मध्ये एव स्थगयति स घटमानकविः॥

**6. महाकविः -**

**"योऽन्यतरप्रबन्धे प्रवीणः स महाकविः"** इति। यो गद्यपद्यान्यतर-प्रबन्धरचने प्रवीणः स महाकविः॥

**7. कविराजः –**

**"यस्तु तत्र तत्र भाषाविशेषे तेषु प्रबन्धेषु तस्मिंस्तस्मिंश्च रसे स्वतन्त्रः स कविराजः। ते यदि जगत्यपि कतिपये॥"** इति। यश्च मागधीशौरसेन्यादिप्राकृतसंस्कृतापभ्रंशादिभाषासु गद्यपद्ययोः तत्तद-लङ्कार स कविराजः। कविराजास्तु प्रायशो नैव भवन्ति, ते यदि जगति सम्भवन्ति तर्हि कतिपये एव॥

**8. आवेशिकः -**

**"यो मन्त्राद्युपदेशवशाल्लब्धसिद्धिरावेशसमकालं कवते स आवेशिकः"** इति। यो मन्त्रप्रभावात् सारस्वतचूर्णसेवन-मन्त्रसिद्धपुरुषकृत-शिरःस्पर्श-देवतावरदानादिवशाद्वा लब्धकवित्वसिद्धिः आवेशकाले एव कवते स आवेशिककविः॥

**9. अविच्छेदी -**

**"यो यदैवेच्छति तदैवाविच्छिन्नवचनः सोऽविच्छेदी"** इति। य इच्छामात्रेण काव्यं कर्तुं शक्नोति, न तस्य किमपि प्रतिबन्धकं सोऽविच्छेदी॥

**10. सङ्क्रामयिता -**

**"यः कन्याकुमारादिषु सिद्धमन्त्रः सरस्वतीं सङ्क्रामयति स सङ्क्रामयिता"** इति। यः सिद्धमन्त्रः पुरुषः स्वशक्तिं कन्याकुमारादिषु शिरःस्पर्शादिद्वारा सङ्क्रामयति जनयति वा स सङ्क्रामयिता।

इत्थं कवीनां भेदप्रभेदाः सलक्षणं सोदाहरणं च निरूप्य ततः कव्यवस्थाः तल्लक्षणानि च यथाकाव्यमीमांसं यथाचन्द्रिकाव्याख्यानं च समुपस्थापितानि॥ इति शम्॥

## उपयुक्तग्रन्थसूची (Reference Books)


| क्र.सं. | ग्रन्थनाम | प्रकाशनादिविवरणम् |
|---|---|---|
| 1. | **काव्यप्रकाशः**<br>राजानकश्रीमम्मटविरचितः | सम्पादकः– रेवाप्रसादद्विवेदी, प्रकाशकः– काशीहिन्दूविश्वविद्यालयः, वाराणसी - 1981 |
| 2. | **काव्यमीमांसा**<br>राजशेखरविरचिता | आचार्यपुल्लेलश्रीरामचन्द्रुडुविरचिता बालनन्दिनीव्याख्या सहिता, हैदराबाद |
| 3. | **काव्यमीमांसा** - राजशेखरविरचिता | 1-5 अध्यायपर्यन्ता, नारायणखिस्ते कृता चन्द्रिकाटीका सहिता, प्रकाशकः - चौखम्बासंस्कृतसीरीज् आफीस्, बनारस सिटी, १९८७ |
| 4. | **काव्यमीमांसा** - राजशेखरविरचिता | डॉ. गङ्गासागररायविरचिता प्रकाशहिन्दीव्याख्योपेता, चौखम्बाविद्याभवन, वाराणसी, द्वितीयसंस्करणम् - 1977 |
| 5. | **काव्यमीमांसा** - राजशेखरकृता | अनुवादकः - स्वर्गीय पण्डित केदारनाथशर्मा सारस्वत, बिहार राष्ट्रभाषा परिषद्, पटना - द्वितीयसंस्करणम् - 1965 |
| 6. | **काव्यमीमांसा** - कविराजराजशेखरविरचिता | पण्डित मधुसूदनमिश्रनिर्मितया मधुसूदनीविवृत्या समुद्भासिता, चौखम्बा संस्कृत सीरीज आफीस, वाराणसी सिटी - 1934 (१९९१) |
| 7. | **वेणीसंहारम्** भट्टनारायणप्रणीतम् | जगद्धरकृतया टिप्पण्या सहितम्, परबोपाह्वेन पाण्डुरङ्गात्मजेन काशीनाथेन संस्कृतम्, निर्णयसागर-मुद्रणालये मुद्रापयित्वा प्रकाशितम्, मुम्बाई - 1930 |


## अधोटिप्पण्यः (Foot Notes)

1. काव्यमीमांसा, चन्द्रिकाटीका, नारायण खिस्ते, पृ. ५४
2. काव्यमीमांसा, 5 बालानन्दिव्याख्या, पृ. 44; चन्द्रिकाटीका, पृ. ५४
3. काव्यमीमांसा, 5 बालनन्दिव्याख्या, पृ. 44; चन्द्रिकाटीका, पृ. ५४
4. काव्यमीमांसा, 5.7 बालानन्दिव्याख्या, पृ. 46; चन्द्रिकाटीका, पृ. ५६
5. काव्यमीमांसा, 5.8 बालानन्दिव्याख्या, पृ. 46; चन्द्रिकाटीका, पृ. ५७
6. काव्यमीमांसा, 5.9 बालानन्दिव्याख्या, पृ. 47; चन्द्रिकाटीका, पृ. ५७
7. काव्यमीमांसा, 5.10 बालानन्दिव्याख्या, पृ. 47; चन्द्रिकाटीका, पृ. ५७
8. काव्यमीमांसा, 5.11 बालानन्दिव्याख्या, पृ. 47; चन्द्रिकाटीका, पृ. ५८
9. काव्यमीमांसा, 5.12 बालानन्दिव्याख्या, पृ. 48; चन्द्रिकाटीका, पृ. ५८
10. काव्यमीमांसा, 5.13 बालानन्दिव्याख्या, पृ. 48; चन्द्रिकाटीका, पृ. ५९
11. काव्यमीमांसा, 5.15 बालानन्दिव्याख्या, पृ. 49; चन्द्रिकाटीका, पृ. ६०
12. काव्यमीमांसा, 5.16 बालानन्दिव्याख्या, पृ. 50; चन्द्रिकाटीका, पृ. ६१
13. काव्यमीमांसा, 5.17 बालानन्दिव्याख्या, पृ. 51; चन्द्रिकाटीका, पृ. ६२
14. वेणीसंहारः, 1.23
15. काव्यमीमांसा, 5 बालानन्दिव्याख्या, पृ. 44
16. काव्यमीमांसा, 5 चन्द्रिका, पृ. ६३-६४